# .. Selected verses from Rigveda ..

## ॥ ऋग्वेद श्लोक ॥

## Sanskrit Document Information

Text title : Rigveda shloka

File name : samplerig.itx

Location : doc_veda

Language : Sanskrit

Subject : philosophy/hinduism/religion

Latest update : November 1, 2010

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 10, 2017

*sanskritdocuments.org*

# ॥ ऋग्वेद श्लोक ॥

Selected verses from Rigveda

१०८९११५०११ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
१०८९११५०१२ देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवे-दिवे ॥

१०८९११५०२१ देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नोनि वर्तताम् ।
१०८९११५०२२ देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ॥

१०८९११५०३१ तान् पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
१०८९११५०३२ अर्यमणं वरुणं सोममश्विना सरस्वतीनः सुभगा मयस् करत् ॥

१०८९११५०४१ तन् नो वातो मयोभु वातु भेषजं तन् माता पृथिवी तत्पिता द्यौः ।
१०८९११५०४२ तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥

१०८९११५०५१ तमीशानं जगतस्तस्थुषस् पतिं धियंजिन्वमवसे हूमहे वयम् ।
१०८९११५०५२ पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

१०८९११६०६१ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पुषा विश्ववेदाः ।
१०८९११६०६२ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

१०८९११६०७१ पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषुजग्मयः ।
१०८९११६०७२ अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥

१०८९११६०८१ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
१०८९११६०८२ स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितं यदायुः ॥

१०८९११६०९१ शतमिन् नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
१०८९११६०९२ पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥

१०८९११६१०१ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
१०८९११६१०२ विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥

१०९०१७०११ ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् ।
१०९०१७०१२ अर्यमा देवैः सजोषाः ॥

१०९०१७०२१ ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः ।
१०९०१७०२२ व्रता रक्षन्ते विश्वाहा ॥

१०९०१७०३१ ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः ।
१०९०१७०३२ बाधमानाअप द्विषः ॥

१०९०१७०४१ वि नः पथः सुविताय चियन्त्विन्द्रो मरुतः ।
१०९०१७०४२ पूषा भगो वन्द्यासः ॥

१०९०१७०५१ उत नो धियो गोअग्राः पूषन् विष्णवेवयावः ।
१०९०१७०५२ कर्ता नः स्वस्तिमतः ॥

१०९०१८०६१ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
१०९०१८०६२ माध्वीर्नः सन्त्वोषधीः ॥

१०९०१८०७१ मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः ।
१०९०१८०७२ मधु द्यौरस्तु नः पिता ॥

१०९०१८०८१ मधुमान् नो वनस्पतिर्मधुमानस्तु सूर्यः ।
१०९०१८०८२ माध्वीर्गावो भवन्तु नः ॥

१०९०१८०९१ शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।
१०९०१८०९२ शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥

Verses 1-89-15-1 through 1-90-18-9-

.. Selected verses from Rigveda ..
was typeset using XƎLATEX 0.99996
on May 10, 2017

Please send corrections to *sanskrit@cheerful.com*